# Shri Lakshmi Hayagriva dhyAnam

# શ્રીલક્ષ્મીહયગ્રીવધ્યાનમ્

## Document Information

Text title : Shri Lakshmi Hayagriva dhyAnam

File name : lakShmIhayagrIvadhyAnam.itx

Category : vishhnu, dhyAnam

Location : doc_vishhnu

Transliterated by : Chandrasekhar Karumuri

Proofread by : Chandrasekhar Karumuri

Latest update : September 19, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 20, 2023

*sanskritdocuments.org*

Shri Lakshmi Hayagriva dhyAnam

# શ્રીલક્ષ્મીહયગ્રીવધ્યાનમ્

વિધિવદ્વિધિવન્દિતૌ પયોધૌ શ્રુતિમન્વેષયિતું કૃતાવગાહૌ ।
મધુકૈટભમર્ધિનૌ મનોજ્ઞૌ મનવૈ તે ચરણૌ હયાસ્ય! દેવ! ॥ ૧॥

યદુદગ્રજવોત્થસિન્ધુભઙ્ગવ્રજઘાતક્ષતપૌરુષા વુભૌ તૌ ।
શયિતં તુ ભવન્તમાપ્ય નષ્ટૌ તવ જઙ્ઘે હયવક્ત્ર! મે હૃદિ સ્તામ્ ॥ ૨॥

સિતપદ્મનિવિષ્ટયદ્વયૈકસ્થિતલક્ષ્મીશુભલમ્બિપાદયુક્તઃ ।
ચરણસ્તવ દક્ષિણઃ શરણ્યં મમ વાગીશ! તવોરુયુગ્મ મેતત્ ॥ ૩॥

પ્રણમદ્વિધિવાસભવ્યપદ્મં શુભપીતામ્બરશોભિ દિવ્યભૂષમ્ ।
અખિલાણ્ડસમુદ્ભવાર્થનાભિસ્મરણે સ્યાદુદરં હયાસ્ય તે મે ॥ ૪॥

ઉપદેશકરેણ દક્ષિણેન સ્ફુરિતં પુસ્તકધારિણા કરેણ ।
અરિશઙ્ખનિવર્તિતારિપાણિદ્વયમશ્વાસ્વ! વપુસ્તવ સ્મરેયમ્ ॥ ૫॥

નિખિલાશ્રિતજીવધીવિકાસ વ્રજવદ્ભાવિતદીપ્તિકૌસ્તુભાઢ્યમ્ ।
કલિતં વનમાલયા ચ વક્ષસ્તવ સંશ્લિષ્ય ધિયા હયાસ્ય મોદે ॥ ૬॥

નિકટસ્થિતપાઞ્ચજન્યવાઞ્છ્યસ્ફુરદાકારશુભધ્વનિં સુદીર્ઘામ્ ।
પરખણ્ડનતર્કબાણપૂર્ણેષુધિતુલ્યાં હયકન્ધરાં સ્મરામિ ॥ ૭॥

અમૃતાયિતહલ્હલુક્તિધૂતાખિલહાલાહલરૂપહૈતુકોક્તિ ।
વદનં સદનં કરોત્વજસ્રં હૃદયં મે સદયં પ્રભો! હયાસ્ય! ॥ ૮॥

તુરગાસ્ય! કટાક્ષધારયા ત્વં
કલુષવ્રાતમપાસ્ય મે વિધેહિ ।
શઠજિદ્યતિરાજવેદચૂડા -
ગુરુસૂક્ત્યાદૃતસર્વતત્ત્વબોધમ્ ॥ ૯॥

શ્રયદાર્તિરવશ્રુતીચ્છયેવ
સ્થુટ મુન્નામિતકર્ણમશ્વવક્ત્ર!।

સ્ફુટસાન્દ્રસટાજટાભિરામં
    રમયેન્મે હૃદયં શિરસ્ત્વદીયમ્ ॥ ૧૦॥

ઇતિ તે હયવક્ત્ર! દિવ્યરૂપે
    પદજઙ્ઘોરુકટિક્રમેણ પાણીન્ ।
હૃદયં ગળમાસ્યમક્ષિ શીર્ષં
    કલયેત્ યઃ સકલાઃ કલાસ્તદાપ્તાઃ ॥ ૧૧॥

સિતપદ્મનિષણ્ણમમ્બુજાક્ષં
    સ્ફટિકાદ્રિપ્રતિમં રમાસમેતમ્ ।
હયકણ્ઠમકુણ્ઠવાહિધીવાક્
    દ્વયસિદ્ધ્યૈ ઉષસિ સ્મરામિ નિત્યમ્ ॥ ૧૨॥

અભિગન્તુમપિ પ્રપત્તુ મેવં
    ગદિતું મઙ્ગળમાતનોઃ સ્તુતીસ્ત્વમ્ ।
ત્વદુપાશ્રિતમન્મુખેનપૂર્વં
    હયવક્ત્રાકૃતિચિન્તનં ત્વિદાનીમ્ ॥ ૧૩॥

ઇતિ સન્ધ્યસમીક્ષિતાવદાતસ્ફુટપૂર્ણાશ્વવપુહયાસ્યભક્તઃ!।
નવદેશિકવીરરાઘવાર્યો વ્યતનોત્ પ્રાતુરુષસ્સુ ચિન્તનાર્થમ્ ॥ ૧૪॥

વિદ્યાવિશ્રાણનોદન્તો હયગ્રીવઃ પરઃ પુમાન્ ।
અનુગ્રહં વિતનુતામાશ્રિતેષ્વનવગ્રહમ્ ॥ ૧૫॥

સેવે લક્ષ્મીહયમુખ! કુરુ ત્વં દયાત્વત્વદાબ્જે
    જાનુન્યૂરૌ ઘનકટિતટે દિવ્યપીતામ્બરાઢ્યે ।
કુક્ષૌ વક્ષસ્યપિ ચ વિપુલે વૈજયન્ત્યાદિભૂષે
    હસ્તે પુસ્તાન્વયિનિ લલિતાક્ષે સચક્રે સશઙ્ખે ॥ ૧૬॥

દીર્ઘગ્રીવા મુખપુટમહાનાસિકા ગણ્ડપાળી
    સ્મેરામ્ભોજપ્રતિમનયનભ્રૂલસદ્વક્ત્રબિમ્બે ।
શીર્ષે ચોચ્ચે શ્રવસિ પરિતો વિસ્તૃતાયાં સટાયાં
    સ્મૃત્વા ચિન્તામુખમનુભવેત્ શ્રીસખં ત્વાં સમગ્રમ્ ॥ ૧૭॥

ઇતિ શ્રીલક્ષ્મીહયગ્રીવધ્યાનં સમ્પૂર્ણમ્ ।

Proofread by Chandrasekhar Karumuri

*Shri Lakshmi Hayagriva dhyAnam*

pdf was typeset on September 20, 2023

Please send corrections to *sanskrit@cheerful.com*